# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**-आचार्य (SEM-1) | **प्रश्नपत्रम् - २** (New & Old) | **गुणाः** - ७० |
| **विषयः** - धर्मशास्त्रम् | **कोड- CC- 4-1-1** | **समयः** - २ तः ५ |
| **दिनाङ्कः** - १५/१२/२०१८ | **सन्दर्भग्रन्थः**- निर्णयसिन्धुः-प्रथमपरिच्छेदः-पारास्करगृह्यसूत्रम्-प्रथमकाण्डम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ एकस्य व्याख्यात्मकमुत्तरं ससन्दर्भं प्रदेयम्।** **१०**

१. चन्द्रादिमासव्यवस्थाविषये व्याख्यात्मकमुत्तरं लिखत।

२. तिथिर्वेधादिनिर्णयं इति विषये सप्रमाणं विलिख्य व्याख्यायत।

**प्र-२ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं सविस्तरं प्रदेयम्।** **०५**

१. व्रतारम्भकालः।

२. प्रतिमास्वरूपनिर्णयम्।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ एकस्य व्याख्यात्मकमुत्तरं ससन्दर्भं प्रदेयम्।** **१०**

१. व्रतारम्भे के धर्मा इति विलिख्य व्याख्यायत।

२. व्रतोद्यापनाशक्तौ किं कर्तव्यम्? इति विलिख्य व्याख्यायत।

**प्र-४ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं सविस्तरं प्रदेयम्।** **०५**

१. सन्ध्यालक्षणम्।

२. भद्रानिर्णयम्।

**॥ तृतीयान्वितिः ॥**

**प्र-५ एकस्य ससन्दर्भं व्याख्या कार्या।** **१०**

१. भार्या पत्युव्रतं कुर्यात् भार्यायाश्च पतिव्रतम्।
असामर्थ्ये परस्ताभ्यां व्रतभङ्गे न जायते॥

२. सन्ध्याकाले तथा चैत्रे प्रसुप्ते च जनार्दने।
बुधाष्टमी न कर्तव्या हन्ति पुण्यं पुराकृतम्॥

**प्र-६ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं सविस्तरं प्रदेयम् ।** **०५**

१. प्रतिपदादितिथिनिर्णयम् ।

२. स्त्रीशूद्रादीनां व्रतादिषु कर्तव्यता ।

**प्र-७ एकस्य निबन्धात्मकमुत्तरं यथाग्रन्थं सविस्तरं प्रदेयम् ।** **१०**

१. षडर्घ्या भवन्ति आचार्यऋत्विग्वैवाह्यो राजा प्रियः स्नातक इति ।

२. पक्षादिषु स्थालीपाकं स्रवयित्वा दर्शपूर्णमासदेवताभ्यो हूत्वा जुहोति ब्रह्मणे प्रजापतये विश्वेभ्यो देवेभ्यो द्यावापृथिवीभ्यामिति ।

**॥ चतुर्थान्वितिः ॥**

**प्र-८ एकस्य सूत्रस्य ससन्दर्भं व्याख्या कार्या ।** **०५**

१. पारस्करगृह्यसूत्रमहत्त्वम् ।

२. ग्रन्थोक्तदिशा षोडशसंस्कारस्वरूपम् ।

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. कालः कतिविधः कश्च?

२. अयनम् कतिविधम्? किन्नामकम्?

३. अब्दः कतिविधः?

४. ऋतमासभेदाः कति सन्ति? के च ते?

५. मासभेदाः कति सन्ति? के च ते?

६. ऋतवः कति सन्ति? काश्च ताः?

७. पितृकार्ये कः मासभेदः गण्यते?

८. सौरमासे किं कार्यं कर्तव्यम्?

९. यामादि कर्मणि कः मासभेदः स्वीक्रियते?

१०. यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा ।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदश ॥

११. मलमाासे किं न कर्तव्यम्?

१२. वेधः कतिविधः?

१३. पारस्कर गृह्यसूत्रे कति काण्डानि सन्ति?

१४. पारस्करगृह्यसूत्रं कस्य वेदस्य ज्ञेयम्?

१५. पारस्कराचार्यमतानुसारं कति संस्काराः सन्ति?

--००--